# Code No. 1005

**CLASS : 11th (Eleventh)** **Series : 11-M/2019**

रोल नं० ☐☐☐☐☐☐☐☐☐☐

# संस्कृत

(Only for Fresh/School Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **15** हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

www.MSEducationTv.com

*निर्देशः -*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'

## (अपठित-अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत - $2 \times 5 = 10$

www.MyEducationTv.com

दिल्लीनगरं भारतस्य राजधानी वर्तते। एतत् नगरमतीव प्राचीनमैतिहासिकं चास्ति। अस्य पुरातनं नाम इन्द्रप्रस्थः आसीत्। दिल्लीनगरे बहूनि प्राचीनानि नवानि च दर्शनीमानि स्थानानि विद्यन्ते। तथाहि-विरला-मन्दिरम्, संसद्-भवनम्, राष्ट्रपति-भवनम्, राष्ट्रीय-संग्रहालयः, जन्तुशाला कुतुबमीनारश्च। दिल्लीनगरं व्यापारस्य उद्योगानां चापि केन्द्रम् वर्तते। संक्षेपतः इति कथयितुं शक्यते - 'यत् दिल्लीनगरमतिसमृद्धम् वैभवपूर्णम् चास्ति।'

(क) दिल्लीनगरं कस्य राजधानी वर्तते ?

(ख) दिल्लीनगरं केषां केन्द्रम् वर्तते ?

(ग) अस्य पुरातनं नाम किम् आसीत् ?

(घ) संक्षेपतः किं कथयितुं शक्यते।'

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

## खण्डः 'ख'
## (रचनात्मक-लेखनम्)

**2.** अधोलिखितेषु विषयेषु ***एकम*** धिकृत्य लघुनिबन्धं संस्कृतभाषायां लिखत - 6

(क) गणतन्त्रदिवसः,

(ख) मम मित्रम्,

(ग) मम प्रियः कविः।

**3.** अधोलिखितेषु कस्यापि ***एकस्य*** जीवनकृतिविषयकः संक्षिप्तपरिचयः हिन्दीभाषायां लिखत - 4

(क) महर्षिः वाल्मीकिः,

(ख) महाकविः शूद्रकः।

**4.** अधोलिखितेषु कस्यापि ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषायां लिखत -4

(क) महाभारतम्,

(ख) जातकमाला।

www.MsEducationTv.com

## खण्डः 'ग'
## (पठित - अवबोधनम्)

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या - 4

पुष्पभारसमृद्धानि शिखराणि समन्ततः।
लताभिः पुष्पिताग्राभिरूपगूढानि सर्वतः।।

**6.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या - 4

रदनिके ! किम्मम एतया मृत्तिकाशकटिकया ? तामेव सौवर्णशकटिकां देहि।

**7.** अधोलिखितासु सूक्ति***द्वयस्य*** भावार्थं हिन्दीभाषायां लिखत - $2 \times 2 = 4$

(क) तन्मे मनः शिवसङ्कल्पमस्तु।

(ख) यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम्।

(ग) दयालुः पुरुषः श्रेष्ठः सर्वजन्तूपकारकः।

**8.** अधोलिखितगद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत - $1 \times 3 = 3$

सलिलतीरवासिनः पक्षिणः वायसगणाः च यावत् तान् मत्स्यान् भक्षयितुं चिन्तयन्ति स्म तावद् विषाददैन्यवशगं मीनकुलमवेक्ष्य वोधिसत्त्वः करुणायमानः चिन्तामापेदे। कष्टाबत इयम् आपद् आपतिता मीनानाम्।

(क) कः करुणायमानः चिन्तामापेदे ?

(ख) केषाम् इयम् आपद् आपतिता ?

(ग) के मत्स्यान् भक्षयितुं चिन्तयन्ति स्म ?

www.MsEducationTv.com

**9.** अधोलिखितश्लोकं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत - $1 \times 2 = 2$

विदुरा नाम वै सत्या जगर्हे पुत्रमौरसम्।
निर्जितं सिन्धुराजेन शयानं दीनचेतसाम्।।

(क) विदुरा कं जगर्हे ?

(ख) पुत्रः केन निर्जितः ?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 4 = 4$

(क) गान्धिनः मनसा <u>हरिश्चन्द्रनाटकं</u> प्रयुक्तम् आसीत्।

(ख) ईशः <u>वर्षातपयोः</u> ताभ्यां सार्धं तिष्ठति।

(ग) <u>सिन्धोः</u> विलम्बेन आगता रत्ना चिन्तिता।

(घ) भूतले <u>जीवनरक्षा</u> परिक्षीयते।

### खण्डः 'घ'
### (अनुप्रयुक्त व्याकरणम्)

www.MsEducationTv.com

**11.** अधोलिखितेषु छन्देषु कस्यापि ***एकस्य*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – 4

(i) अनुष्टुप्,

(ii) इन्द्रवज्रा।

**12.** अधोलिखितेषु अलंकारेषु कस्यापि ***एकस्य*** लक्षणोदाहरणौ संस्कृतभाषायां लिखत – 4

(i) अनुप्रास,

(ii) यमक।

**13.** (क) विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ग) करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** कोष्ठकाङ्कितेषु पदेषु उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयत – $1 \times 5 = 5$

(क) ............ परितः वृक्षाः सन्ति। (विद्यालयम्/विद्यालयस्य)

(ख) मोहनः .......... सह क्रीडति। (मित्रस्य/मित्रेण)

(ग) ............ नमः। (देवाय/देवेन)

(घ) ........... हसितेन। (अलम्/सह)

(ङ) ........... अवकाशः आसीत्। (श्वः/ह्यः)

**खण्डः 'ङ'**

**(बहुविकल्पीय वस्तुनिष्ठप्रश्नाश्च)**

www.MSEducationTv.com

**15.** अधोलिखितप्रश्नानां प्रदत्तोत्तरविकल्पेषु ***एकं*** शुद्धविकल्पं विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 16 = 16$

(क) सुख + अनिलः' अत्र सन्धियुक्तपदमस्ति –

(i) सुखालः (ii) सुखानिलः

(iii) सुखनलः (iv) सुखलः

(ख) 'जयोऽस्तु' इति पदस्य सन्धिविच्छेदोऽस्ति –

(i) जयः + अस्तु (ii) ज + अस्तु

(iii) जय + तु (iv) जय + स्तु

(ग) 'प्रत्यहम्' इति पदे कः समासः ?

(i) तत्पुरुषः (ii) अव्ययीभावः

(iii) द्वन्द्वः (iv) कर्मधारयः

(घ) 'सुवर्णव्यवहारः' इति समस्तपदस्य विग्रहः अस्ति ?

(i) सुवर्णस्य व्यवहारः (ii) वर्ण व्यवहारः

(iii) सुवर्ण व्यवहारः (iv) सुवर्णं व्यवहारः

(ङ) 'पतमानः' इति पदे कः प्रत्ययः ?

(i) ल्यप् (ii) क्त्वा

(iii) तुमुन् (iv) शानच्

(च) 'आ + दा + ल्यप्' अत्र निष्पन्नम् रूपमस्ति –

(i) दत्त्वा (ii) आदाय

(iii) आदत्त (iv) आदालय

(छ) 'करुणायमानः बोधिसत्त्वः' अत्र विशेषणपदम् किम् ?

(i) करुणायमानः (ii) बोधिसत्त्वः

(iii) करुणा (iv) सत्त्वः

(ज) 'सर्वान् तनयान्' अत्र विशेष्यपदं किम् ?

(i) सर्वान् (ii) तनयान्

(iii) सर्व (iv) तनय

(झ) 'सत्या' इति पदस्य विलोमपदं किम् ?

(i) रविः (ii) दिनकरः

(iii) सूर्यः (iv) असत्या

(ञ) 'विरुद्धम्' इति पदस्य विलोमपदं किम् ?

(i) अविरुद्धम् (ii) रूपम्

(iii) जनम् (iv) विरोधम्

www.MsEducationTv.com

(ट) 'अलीकम्' इति पदस्य पर्यायपदं किम् ?

(i) लोकम्  (ii) नाथम्

(iii) जनम्  (iv) असत्यम्

(ठ) 'खगः' इति पदस्य पर्यायपदं किम् ?

(i) जनः  (ii) रूपः

(iii) पक्षी  (iv) वृद्धः

(ड) 'मुखेषु' इति पदे का विभक्तिः ?

(i) तृतीया  (ii) चतुर्थी

(iii) पंचमी  (iv) सप्तमी

(ढ) 'युष्मद्' शब्दस्य प्रथमा - बहुवचने शब्दरूपं किम् ?

(i) त्वम्  (ii) युवाम्

(iii) यूयम्  (iv) अहम्

(ण) 'करोति' इति पदे का धातुः ?

(i) कर्  (ii) कृ

(iii) कुर्  (iv) करत्

(त) 'अस्' धातोः लङ्लकार - प्रथमपुरुषैकवचने धातुरूपं किम् ?

(i) आसीत्  (ii) आस्ताम्

(iii) आसन्  (iv) आसम्

www.MsEducationTv.com